(784) "त्रक्ष गतौ" (I-भ्वादिः-660. अक. सेट्. पर.)

त्क्षकः-क्षिका, त्क्षकः-क्षिका, तित्क्षिषकः-षिका, तात्क्षकः-क्षिका; त्क्षिता-त्री, त्क्षयिता-त्री, तित्क्षिषिता-त्री, तात्क्षिता-त्री; इत्यादीनि सर्वाणि रूपाणि तक्षतिवत् (691) बोध्यानि। शतरि-त्क्षन्-न्ती इति विशेषः। 'त्क्ष ष्ट्रक्ष णक्ष गतौ' इति पठित्वा, 'त्रयोऽप्यकारमध्याः' इति बालमनोरमायामुक्तत्वादत्रापि अकारमध्योऽयं पठितः। सर्वेऽपि प्राचीना माधवधातुवृत्तिकारादयः तृक्ष इत्येव पठन्ति।

(785) "त्रख गतौ" (I-भ्वादिः-155. सक. सेट्. पर.)

'त्रखि' इति चन्द्रः।

त्राखकः-खिका, त्राखकः-खिका, तित्रखिषकः-षिका, तात्रखकः-खिका; इत्यादीनि सर्वाण्यपि रूपाणि कखतिवत् (141) ज्ञेयानि। क्विपि तु — सुत्रक्-सुत्रग्-सुत्रखौ-सुत्रखः इति विशेषः।

(786) "त्वदि चेष्टायाम्" (I-भ्वादिः-69. अक. सेट्. पर.)

त्न्दकः-न्दिका, त्न्दकः-न्दिका, तित्रन्दिषकः-षिका, तात्न्दकः-न्दिका; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकक्रन्दतिवत् (163) ज्ञेयानि। [A]त्न्दनम्।

(787) "त्रपूष् लज्जायाम्" (I-भ्वादिः. 374. अक. वेट्. आत्म.)

घटादिः।

त्रापकः-पिका, [1]त्रपकः-पिका, [2]त्रापकः-पिका, [3]तित्रपिषकः-षिका,

---

1. भोजमतेनास्य धातोः घटादिषु पाठः। तदानीं 'घटादयो मितः' (ग. सू. भ्वादौ) इति मित्त्वात्, 'मितां ह्रस्वः' (6-4-92) इति णौ उपधाह्रस्वः। एवं ण्यन्ते सर्वत्र ज्ञेयम्।

2. भोजाद् अन्येषां सर्वेषां मतेनास्य धातोः घटादिपाठो न। तदानीं मित्त्वाभावेनोपधाह्रस्वाभावे रूपमेवम्। एवं तृजादिष्वपि त्रापयिता-त्री इत्यादीनि रूपाण्यूह्यानि।

3. ऊदित्त्वेन, 'स्वरतिसूतिसूयतिधूञूदितो वा' (7-2-44) इति वलाद्यार्धधातुकेषु इड्विकल्पः। इट्पक्षे रूपमेवम्। इडभावपक्षे तित्रप्सकः इत्यादीनि रूपाणि, इति ज्ञेयम्। तव्यदादिप्रत्ययेष्वप्येवमिड्विकल्पो ज्ञेयः।

A. 'पराक्रमत्न्दनकन्दितासुरं संक्रन्दनक्रन्दितमीक्षिताऽस्महे॥' धा. का. 1.10.